दिनाङ्क :- 10.07.2025

प्रात: - 06:55

**प्रधानमन्त्री-नामीबियासंसद्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् अफ्रीकादेशः न केवलं अपरिष्कृतवस्तूनां स्रोतरूपेण दृष्टव्यः, अपितु सः एतादृशेण महाद्वीपत्वेन द्रष्टव्यः यः मूल्यनिर्माणे सततविकासे च अग्रगण्यः स्यात्। नामीबियायाः संसद्सभायाम् सम्बोधयता श्रीमोदिना अफ्रीकीसङ्घस्य त्रिषष्ट्यधिक-द्विसहस्त्रतमायाः कार्यसूचेः विशिष्य तस्य औद्योगीकरणलक्ष्येषु भारतस्य दृढप्रतिबद्धता पुनः प्रतिपादिता।तेनोक्तं यत् भारतं वैश्विकदक्षिणस्य विषये गम्भीरतया चिन्तां वहति, सहैव भारतं न केवलं स्वयमेव अपि तु समग्रजगता सह विकासे विश्वासं करोति।प्रधानमन्त्रिणा पुनः प्रतिपादितं यत् भारतं स्थानीयकौशलविकासाय, स्थानीयोद्योगनिर्माणाय, अफ्रीकायां स्थानीय-नवाचार-प्रोत्साहनाय च निरन्तरं निवेशं करिष्यति।

**प्रधानमन्त्री-नामीबिया**

प्रधानमन्त्रिणा नरेन्द्रमोदिना घाना, त्रिनिदाद-टोबैगो, अर्जेण्टीना, ब्रज़ील्, नामीबिया इत्येतेषां पञ्चदेशानां स्वकीया सफलयात्रा सम्पादिता । स्वीययात्रायाः अन्तिमचरणे भारतनामीबियादेशाभ्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः उपस्थितौ नामीबियायां उद्यमिताविकासकेन्द्रस्य स्थापना सहैव स्वास्थ्य-चिकित्साक्षेत्रे, सहयोगश्चाधिकृत्य द्वयोः सन्धिपत्रयोः हस्ताक्षरं सम्पादितम् । अवधेयं यत् अस्य वर्षस्यान्ते नामीबियादेशे डिजिटल-भुगतान-प्रणाल्याः समारम्भः, भारतस्य नेतृत्वे सञ्चालितयोः द्वयोः वैश्विकपदक्षेपयोः आपन्निवारक-अवसंरचनायाः कृते गठबन्धनं, सहैव वैश्विकजैवेन्धनगठबन्धनं इत्यान्तर्गतं नामीबियादेशस्य प्रवेशः च इत्येताः तिस्त्रः प्रमुखघोषणाः समाहृताः।

विदेशविभागस्य सचिवः दम्मूरविः अवदत् यत् नामीबियायाः राजधान्यां विंडहोकनगरे प्रधानमन्त्रिणः नरेन्द्रमोदिनः सहैव नामीबियायाः राष्ट्रपतेः नेतुम्बो-नंदी-नादैतवा इत्यनयोः मध्ये प्रतिनिधिस्तरीय-वार्तावधौ विविधेषु प्रकरणेषु चर्चा समभवत्। एतस्यां चर्चायां खनिज-हाइड्रोकार्बन-रक्षा- सहयोग-स्वास्थ्य-डिजिटलसार्वजनिक-अवसंरचना-पर्यावरण-क्षमतानिर्माणादि विषयाः सम्मिलिताः सन्ति। अतः पूर्वं प्रधानमन्त्री नरेन्द्रमोदी नामीबियायाः सर्वोच्चनागरिक-सम्मानेन ऑर्डर ऑफ़ द मोस्ट एनशिएंट वेल्विचिया मिराबिलिस इत्यनेन सम्मानितः। अयं प्रधानमन्त्रिणः चतुर्थं सम्माननं वर्तते। अत्रान्तरे श्रीमोदिना नामीबियायाः सर्वकारेण जनैश्च सह संवादः साधितः। प्रधानमन्त्रिणा प्रोक्तं यत् भारत-नामीबियादेशयोः मैत्री अतीवप्राचीना वर्तते।

शिक्षामन्त्री -दिल्ली

शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन प्रोक्तं यत् देशे शैक्षणिकज्ञानं सामाजिककल्याणेन सह योजयित्वा समाजस्य आकाङ्क्षाः पूरयितुं स्मार्ट-रणनीति-निर्माणस्य अवश्यकता वर्तते। नवदिल्ल्यां एकस्मिन् समारोहे श्रीप्रधानेन प्रोदीरितं यत् भारतदेशः सप्तत्यधिक-द्विसहस्त्रतमवर्षं यावत् शून्य-कार्बन-उत्सर्जनयुतां ऊर्जां प्राप्तुं अग्रे सरति ।

अमितशाह-गुजरातः

गृह-सहकारितामन्त्री अमितशाहः अन्ताराष्ट्रिय-सहकारिता-वर्षस्य अवसरे गुजरातस्य , मध्यप्रदेशस्य, राजस्थानस्य च सहकारी-समितिषु कार्यरताभिः महिलाभिः अन्यकार्यकर्तृभिश्च सह संवादं अकरोत् । श्रीशाहेन कच्छ-जनपदस्य ऊष्ट्र-प्रजनक-मालधारी- सहकारी-समितेः मीरलबेन-रबारी इत्यनया सहापि संवादः कृतः। श्रीशाहेन विज्ञापितं यत् गुजरात-राजस्थानप्रशासनेन मिलित्वा अशेषे हि देशे ऊष्ट्रप्रजनकैः दुग्ध-एकत्रिकरणस्य योजना निर्मीयते।

## क्रीकेट-भारत-इंग्लैण्ड

क्रिकेटक्रीडायाम् भारत-इङ्ग्लैण्डदेशौ अद्य मध्याह्ने एण्डर्सन्-तेन्दुलकर-श्रृंखलायाः तृतीयटेस्ट्-स्पर्धायां स्पर्धिष्यतः। क्रीडा भारतीयसमयानुसारं अपराह्णे सार्धत्रिवादने समारप्स्यते। बर्मिंघम् नगरे विश्रान्तिं लब्ध्वा जसप्रीत-बुम्राह अस्यां टेस्ट्-क्रीडायां पुनरागत्य भारतदलं दृढीकरिष्यति।अपरत्र इङ्ग्लैण्डदलेन स्वीयायाः क्रीडक-सूचेः घोषणा कृता यत्र जोफ्रा आर्चर इत्येषः चत्वारि वर्षाणि अतीत्य टेस्ट्-क्रीडायाम् पुनरागतः अस्ति।